# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - एप्रिल् २०१९

**कक्षा**-शास्त्री-1(SEM-2) **प्रश्नपत्रम्** - ४ (Old) **गुणाः** - ७०

**विषयः** - पौरोहित्यम् **कोड- OE- 122** **समयः** - ११ तः २

**दिनाङ्कः** - १३/०४/२०१९ **सन्दर्भग्रन्थः**- ब्रह्मनित्यकर्मसमुच्चयः।

---

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः १ अधोलिखितेषु द्वयोः व्याख्या कार्या।** ०८

१ ॐ आजिघ्रकलशम्मह्यात्वाविशन्त्विन्दवः। पुनरूर्ज्जानिवर्त्तस्वसान ÷ ।
सहस्रन्धुक्ष्वोरुधारा पयस्वती पुनर्म्माविशताद्रयिः॥

२ ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषः परुषस्परि। एवानोदूर्व्वेप्रतनुसहस्रेण शतेन च॥

३ ॐ पूर्णादर्व्विपरापतसुपूर्णापुनरापत। व्वस्नेवव्विक्क्रीणावहाऽइषमूर्ज्जꣳशतक्रतो॥

**प्रश्नः २ पुण्याहवाचनप्रयोगस्य पञ्चप्रकाराः समन्त्रं वर्णनीयाः।** ०८

अथवा

**पुण्याहवाचने ''अभिषेक''विधेरावश्यकतां निरूप्य काँश्चन पञ्चमन्त्रान् लिखत।**

**प्रश्नः ३ अधोलिखितेषु द्वयोः टिप्पणीं लिखत।** ०४

१ पुण्याहवाचनम्।

२ कल्याणम्।

३ ऋद्धिः।

४ स्वस्ति।

**प्रश्नः ४ अधोलिखितानां प्रश्नानाम् अतिलघूत्तरं लिखत।** ०५

१ पुण्याहकलशे जलपूरणे कस्य देवस्य आवाहनं भवति?

२ कलशस्य मुखस्थाने कस्य देवस्य स्थानं भवति?

३ कलशस्य पूर्वदिशायां को वेदः वर्तते?

४ समुद्रमन्थनं केषां संवादेन अभवत्?

५ धान्यप्रक्षेपमन्त्रस्य आरम्भिकपदानि कानि?

६ कलशस्य कस्मिन् स्थाने रक्षासूत्रबन्धनं करणीयम्?

७ दूर्वाप्रक्षेपस्य मन्त्रस्य आरम्भिकपदानि कानि?

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः ५ अधोलिखितेषु कयोश्चिद् द्वयोः मन्त्रयोः ससन्दर्भं व्याख्या कार्या।** ०८

१ ॐ हिरण्यरूपाऽउषसोव्विरोकऽउभाविन्द्राऽउदिथः सूर्य्यश्च। आरोहतंव्वरुणमित्रगर्तन्ततश्चक्षाथा-
मदितिन्दितिञ्चमित्रोसिव्वरुणोसि॥

२ ॐ त्वष्टातुरीपोऽअद्भुतऽइन्द्राग्नीपुष्टिवर्द्धना। द्विपदाच्छन्दऽइन्द्रियमुक्षागौर्न्नव्वयोदधुः॥

३ ॐ व्वसोः पवित्रमसिशतधारं व्वसोः पवित्रमसिसहस्रधारम्। देवस्त्वासवितापुनातुव्वसोः
पवित्रेणशतधारेणसुप्वा॥

**प्रश्नः ६ षोडशमातृकाणाम् आवाहने केचन पञ्चमन्त्राः लेख्याः।** ०८

अथवा

**वसोर्धारामातृकाणां केचन क्रमशः पञ्चमन्त्राः लेख्याः।**

**प्रश्नः ७ अधोलिखितेषु एकस्य टिप्पणीं कुरुत ।** **०२**

१ श्र्यादिसप्तवसोर्द्धारापूजनम् ।

२ मातृकापूजनप्रयोगः ।

**प्रश्नः ८ अधोलिखितेषु द्वयोः उत्तरं लिखत ।** **०२**

१ 'पितृभ्यः स्वधायिभ्यः' कस्याः मातृकायाः मन्त्रः अस्ति?

२ पुष्टेः मन्त्रस्य आरम्भिकपदानि कानि?

३ मातृकाक्रमे स्वाहानन्तरं का मातृका आगच्छति?

४ वसोर्द्धारापूजने कति मातृकाः सन्ति?

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः ९ अधोलिखितेषु द्वयोः मन्त्रयोः ससन्दर्भं व्याख्या कार्या ।** **०८**

१ आयुष्यंव्वर्च्चस्यꣳ रायस्पोषमौद्भिदम् । इदꣳ हिरण्यं व्वर्च्चस्वज्जैत्रायाविशतादुमाम् ॥

२ यदाबद्ध्नन्दाक्षायणाहिरण्यꣳशतानीकायसुमनस्यमानाः ।
तन्मऽआबद्ध्नामिशतशारदायायुष्माञ्जरदष्टिर्य्यथासम् ॥

३ ॐ व्वाजेवाजेवतव्वाजिनोनोधनेषुव्विप्राऽअमृताऽऋतज्ञाः ।
अस्यमद्ध्वः पिबतमादयद्ध्वन्तृप्तायातपथिभिर्देवयानैः ।

**प्रश्नः १० आयुष्यमन्त्रजपोपरि विस्तारेण वर्णनं कुरुत ।** **०८**

अथवा

**नान्दीश्राद्धप्रयोगस्य वर्णनं कुरुत ।**

**प्रश्नः ११ अधोलिखितेषु द्वयोः टिप्पणीं कुरुत ।** **०४**

१ गन्धादिदानम् ।

२ आसनदानम् ।

३ अनुव्रजनम् ।

४ भोजननिष्क्रयद्रव्यदानम् ।

**प्रश्नः १२ अधोलिखितप्रश्नेषु पञ्चानाम् अतिलघूत्तरं लिखत ।** **०५**

१ आयुष्यमन्त्रजपः किमर्थं क्रियते?

२ वैश्वदेवसङ्कल्पः किमर्थं करणीयः?

३ पितॄणां विसर्जने किं कर्तव्यम्?

४ कानि पञ्च पापस्थानानि?

५ नान्दीश्राद्धे कस्य पूजनं भवति?

६ नान्दीश्राद्धस्य द्वितीयं नाम किम्?

७ नान्दीश्राद्धे कति आशीर्वादाः?

०००